श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ षड्षष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षट्षष्टितमः सर्गः ॥

विश्वामित्रं रामलक्ष्मणौ च सत्कृत्य जनकेन तान् प्रति स्वगृहे स्थापितस्य दिव्यधनुषः परिचयदानं श्रीरामश्चेद् धनुरारोपयेत्तदेतस्मै सीतां दद्यामिति स्वनिश्चयस्य प्रकटनं च

ततः प्रभाते विमले कृतकर्मा नराधिपः।
विश्वामित्रं महात्मानमाजुहाव सराघवम्॥ **1.66.1** ॥

तमर्चयित्वा धर्मात्मा शास्त्रदृष्टेन कर्मणा।
राघवौ च महात्मानौ तदा वाक्यमुवाच ह॥ **1.66.2** ॥

भगवन् स्वागतं तेऽस्तु किं करोमि तवानघ।
भवानाज्ञापयतु मामाज्ञाप्यो भवता ह्यहम्॥ **1.66.3** ॥

एवमुक्तः स धर्मात्मा जनकेन महात्मना।
प्रत्युवाच मुनिश्रेष्ठो वाक्यं वाक्यविशारदः॥ **1.66.4** ॥

पुत्रौ दशरथस्येमौ क्षत्रियौ लोकविश्रुतौ।
द्रष्टकामौ धनुःश्रेष्ठं यदेतत्त्वयि तिष्ठति॥ **1.66.5** ॥

एतद् दर्शय भद्रं ते कृतकामौ नृपात्मजौ।
दर्शनादस्य धनुषो यथेष्टं प्रतियास्यतः॥ **1.66.6** ॥

एवमुक्तस्तु जनकः प्रत्युवाच महामुनिम्।
श्रूयतामस्य धनुषो यदर्थमिह तिष्ठति॥ **1.66.7** ॥

देवरात इति ख्यातो निमेर्ज्येष्ठो महीपतिः।
न्यासोऽयं तस्य भगवन् हस्ते दत्तो महात्मनः॥ **1.66.8** ॥

दक्षयज्ञवधे पूर्वं धनुरायम्य वीर्यवान्।
विध्वंस्य त्रिदशान् रोषात् सलीलमिदमब्रवीत्॥ **1.66.9** ॥

यस्माद् भागार्थिनो भागं नाकल्पयत मे सुराः।
वराङ्गानि महार्हाणि धनुषा शातयामि वः॥ **1.66.10** ॥

ततो विमनसः सर्वे देवा वै मुनिपुङ्गव।
प्रसादयन्त देवेशं तेषां प्रीतोऽभवद् भवः॥ **1.66.11** ॥

प्रीतियुक्तस्तु सर्वेषां ददौ तेषां महात्मनाम्।
तदेतद् देवदेवस्य धनूरत्नं महात्मनः॥ **1.66.12** ॥

न्यासभूतं तदा न्यस्तमस्माकं पूर्वजे विभौ।
अथ मे कृषतः क्षेत्रं लाङ्गलादुत्थिता ततः॥ **1.66.13** ॥

क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता।
भूतलादुत्थिता सा तु व्यवर्धत ममात्मजा॥ **1.66.14** ॥

वीर्यशुल्केति मे कन्या स्थापितेयमयोनिजा।
भूतलादुत्थितां तां तु वर्धमानां ममात्मजाम्॥ **1.66.15** ॥

वरयामासुरागत्य राजानो मुनिपुङ्गव।
तेषां वरयतां कन्यां सर्वेषां पृथिवीक्षिताम्॥ **1.66.16** ॥

वीर्यशुल्केति भगवन् न ददामि सुतामहम्।
ततः सर्वे नृपतयः समेत्य मुनिपुङ्गव॥ **1.66.17** ॥

मिथिलामप्युपागम्य वीर्यं जिज्ञासवस्तदा।
तेषां जिज्ञासमानानां शैवं धनुरुपाहृतम्॥ **1.66.18** ॥

न शेकुर्ग्रहणे तस्य धनुषस्तोलनेऽपि वा।
तेषां वीर्यवतां वीर्यमल्पं ज्ञात्वा महामुने॥ **1.66.19**॥

प्रत्याख्याता नृपतयस्तन्निबोध तपोधन।
ततः परमकोपेन राजानो मुनिपुङ्गव॥ **1.66.20**॥

अरुन्धन् मिथिलां सर्वे वीर्यसन्देहमागताः।
आत्मानमवधूतं मे विज्ञाय नृपपुङ्गवाः॥ **1.66.21**॥

रोषेण महताविष्टाः पीडयन् मिथिलां पुरीम्।
ततः संवत्सरे पूर्णे क्षयं यातानि सर्वशः॥ **1.66.22**॥

साधनानि मुनिश्रेष्ठ ततोऽहं भृशदुःखितः।
ततो देवगणान् सर्वांस्तपसाहं प्रसादयम्॥ **1.66.23**॥

ददुश्च परमप्रीताश्चतुरङ्गबलं सुराः।
ततो भग्ना नृपतयो हन्यमाना दिशो ययुः॥ **1.66.24**॥

अवीर्या वीर्यसन्दिग्धाः सामात्याः पापकारिणः।
तदेतन्मुनिशार्दूल धनुः परमभास्वरम्॥ **1.66.25**॥

रामलक्ष्मणयोश्चापि दर्शयिष्यामि सुव्रत।
यद्यस्य धनुषो रामः कुर्यादारोपणं मुने।
सुतामयोनिजां सीतां दद्यां दाशरथेरहम्॥ **1.66.26**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षड्षष्टितमः सर्गः॥